स सर्व्वदोषरहितः सुखं संवत्सरं वसेदिति ॥”
अथ तद्दिननिर्णयार्थं उपाकर्म्मदिननिर्णयः क्रियते । यदाह स्मृत्यन्तरे ।
“उपाकर्म्म तु कुर्व्वन्ति ते सामऋग्यजुर्व्विदः ।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्व्वसु ॥”
तथा च । सामवेदिनां भाद्रस्य हस्तानक्षत्रं ऋग्वेदिनां श्रावणस्य श्रवणनक्षत्रं यजुर्व्वेदिनां श्रावणी पूर्णिमोपाकर्म्मकालः । उपक्रमकण्डिकाकीर्त्तनरूपं कर्म्म उपाकर्म्म । अत्र करणाभावे भाद्रे श्रावणेऽपि विधेयम् ।
“अहृष्टौषधयस्तस्मिन् मासे न हि भवन्ति तत् ।
तदा भाद्रपदे मासि श्रावणेऽपि तदिष्यते ॥”
इति बह्वृच्परिशिष्टवचनात् ॥
श्रावणपञ्चम्यनुकल्पः । तदाह गर्गः ।
“यदि स्यात् श्रावणं पर्व्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य च ॥” इति ॥
अत्र भूतविद्धा पूर्णिमा च निषिद्धा । तथा च कालिकापुराणे ।
“चतुर्द्दश्यां समुत्पन्नावसुरौ मधुकैटभौ ।
वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जह्नतुः श्रुतीः ॥
हत्वा तावसुरौ देवः पातालतलवासिनौ ।
आहृता ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम् ॥
संप्राप्तवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः ।
अतो भूतयुते तस्मिन्नोपाकरणमिष्यते ।
आसुरं वर्ज्जयेत् कालं वेदाहरणशङ्कयेति ॥”
व्यासोऽपि ।
“श्रवणेन तु यत् कर्म्म उत्तराषाढ़संयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयतं कुर्य्याच्छ्रावणं कर्म्म यद्भवेत् ।
तत् कर्म्म सफलं विद्यादुपाकरणसंज्ञकमिति ॥”
इति श्रीहरिभक्तिविलासे ५१ विलासः ॥
(रक्षाकर्म्म यथा । उदकुम्भाच्चापो गृहीत्वा प्रोक्षयन् रक्षाकर्म्म कुर्य्यात् तद्यथा ।
“कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च ।
रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् ॥
नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः ।
अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः ।
दिक्षु वास्तुनिवासाश्च पान्तु त्वान्ते नमस्कृताः ॥
पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा ।
पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान् वायुस्तथैव च ।
सोमो व्यानमपानन्ते पर्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः ।
बलमिन्द्रो बलपतिर्म्मनुर्मन्ये मतिन्तथा ॥
कामांस्ते पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्षतु ।
प्रज्ञान्ते वरुणो राजा समुद्रो नाभिमण्डलम् ॥
चक्षुः सूर्य्यो दिशः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पान्तु निशास्तव ॥
रेतस्त्वाप्याययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पातु देहन्तव वसुन्धरा ॥
वैश्वानरः शिरः पातु विष्णुस्तव पराक्रमम् ।
पौरुषं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रुवो भ्रुवौ ॥
एता देहे विशेषेण तव नित्या हि देवताः ।
एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्व्वताम् ।
स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्व्वतौ ॥
स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः ।
पितामहकृता रक्षा स्वस्त्यायुर्व्वर्द्धतां तव ॥
ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः ॥”
इति स्वाहा ॥
एतैर्व्वेदात्मकैर्म्मन्त्रैः कृत्या व्याधिविनाशनैः ।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि ॥”
इति सुश्रुते सूत्रस्थाने पञ्चमेऽध्याये ॥)

रक्षापत्रः, पुं, (रक्षार्थं पत्रमस्य ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥ भूर्ज्जत्वचि, स्त्री ॥

रक्षिका, स्त्री, (रक्षैव । रक्षा+स्वार्थे कन् । टापि अत इत्वम् ।) रक्षा । यथा,—
“अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् ।
स सर्व्वदोषरहितः सुखं संवत्सरं वसेत् ॥”
इति हरिभक्तिविलासे ५१ विलासः ॥

रक्षितं, त्रि, (रक्ष+क्तः ।) कृतरक्षम् । तत्पर्य्यायः । त्रातम् २ त्राणम् ३ अवितम् ४ गोपायितम् ५ गुप्तम् ६ । इत्यमरः ।३।१।१०६॥ (यथा, मनुः । ११ । २३ ।
“कल्पयित्वास्य वृत्तिञ्च रक्षेदेनं समन्ततः ।
राजा हि धर्म्मषड्भागं तस्मात् प्राप्नोति रक्षितात् ॥”
स्त्री, भावे क्तः । रक्षा ॥ * ॥ स्त्रियां टाप् । अप्सरोविशेषः । यथा, महाभारते ।१।६५।५०।
“अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ।
अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ॥”)

रक्षिता, [ऋ] पुं, (रक्षतीति । रक्ष+तृच् ।) रक्षाकर्त्ता । यथा,—
“आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादेष रक्षिता ॥”
इति मात्स्ये १८६ अध्यायः ॥

रक्षिवर्गः, पुं, (रक्षिणां वर्गः समूहः ।) राजाङ्गरक्षकगणः । तत्पर्य्यायः । अनीकस्थः २ । इत्यमरः । २ । ८ । ६ ॥

रक्षोघ्नं, क्ली, (रक्षो राक्षसं हन्तीति । हन्+टक् ।) काञ्जिकम् । इति हेमचन्द्रः ॥ हिङ्गु । इति राजनिर्घण्टः ॥

रक्षोघ्नः, पुं, (रक्षो हन्तीति । हन्+टक् ।) भल्लातकवृक्षः । इति त्रिकाण्डशेषः ॥ श्वेतसर्षपः । इति रत्नमाला ॥ रक्षोघ्नमन्त्रो यथा,—
“स्थाने हृषीकेश तव प्रकीर्त्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्व्वे नमस्यन्ति च सिद्धसंघाः ॥”
इति भगवद्गीतायाम् । ११ । ३६ ॥
“स्थाने इत्ययं युक्तमित्यर्थे । हे हृषीकेश सर्व्वेन्द्रियप्रवर्त्तक यतस्त्वमेवात्यन्ताद्भुतप्रभावो भक्तवत्सलश्च ततस्तव प्रकीर्त्त्या प्रकृष्टया कीर्त्त्या निरतिशयप्राशस्त्यस्य कीर्त्तनेन श्रवणेन च न केवलमहमेव प्रहृष्यामि किन्तु सर्व्वमेव जगच्चेतनमात्रं रक्षोविरोधि प्रहृष्यति प्रकृष्टं हर्षमाप्नोति इति यत् तत् स्थाने युक्तमित्यर्थः । तथा सर्व्वं जगत् अनुरज्यते च त्वद्विषयमनुरागमुपैति इति च यत्तदपि युक्तमेव । यथा रक्षांसि भीतानि सन्ति दिशो द्रवन्ति सर्व्वासु दिक्षु पलायन्त इति यत्तदपि युक्तमेव । यथा सर्व्वेषां सिद्धानां कपिलादीनां संघा नमस्यन्ति चेति यत्तदपि युक्तमेव । सर्व्वत्र तव प्रकीर्त्त्या इत्यस्यान्वयः स्थाने इत्यस्य च । अयं श्लोको रक्षोघ्नमन्त्रः शास्त्रप्रसिद्धः ।” इति तट्टीकायां मधुसूदनसरस्वती ॥ (रक्षोविनाशके, त्रि । यथा सुश्रुते । १ । ५ । “वेदनारक्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रै रक्षां कुर्व्वीत ॥”)

रक्षोघ्नी, स्त्री, (रक्षो हन्तीति । हन+टक् । ङीप् ।) वचा । इति रत्नमाला ॥

रक्षोजननी, स्त्री, (रक्षसां जननीव ।) रात्रिः । इति त्रिकाण्डशेषः ॥ राक्षसमाता च ॥

रक्षोहा, [न्] पुं, (रक्षो हन्तीति । हन्+क्विप् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । स तु ऋग्वेदस्य १० मण्डलस्य १६२ सूक्तस्य ऋषिः ॥ राक्षसहन्तरि, त्रि । यथा, ऋग्वेदे । १० । ८७ । ६ ।
“विप्रः स उच्यते भिषग्रक्षोहा मीवचातनः ॥”
“रक्षोहा रक्षोहन्ता ।” तद्भाष्ये सायणः ॥)

रक्ष्णः, पुं, (रक्ष+“यजयाचयतविच्छप्रच्छरक्षो नङ् ।” ३ । ३ । ९० । इति नङ् ।) त्राणम् । इत्यमरः । ३ । २ । ८ ॥

रख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) रखति । इति दुर्गादासः ॥

रखि, इ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रङ्खति । इति दुर्गादासः ॥

रगि, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, रङ्गति । इति दुर्गादासः ॥

रग, क स्वाद आपने । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०च-सेट् ।) क, रागयति । इति दुर्गादासः ॥

रग, म ए शङ्के । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) म, रगयति । ए, अरगीत् । शङ्कः शङ्का । रगति रोगी कुपथ्येभ्यः । इति दुर्गादासः ॥

रघि, इ क भासि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क, रङ्घयति । भासि दीप्तौ । इति दुर्गादासः ॥

रघि, इ ङ गत्यर्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) इ, रङ्घते । ङ, रङ्घते । इति दुर्गादासः ॥

रघुः, पुं, (लङ्घति ज्ञानसीमां प्राप्नोतीति । लघि+“लङ्घिबंह्योर्नलोपश्च ।” उणा० १ । ३० । इति कुः नलोपश्च । “बालमूललघ्वसुरालमङ्गुलीनां वा लो रत्वमापद्यते इति वक्तव्यम् ।”